संस्कृत

स्तोत्र

क्र.२-३ ८

विष्णुपंजरस्तोत्र

६१६/स्तो.१६८

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

श्रीगणेशायनमः॥श्रीकृष्णायनमः॥ॐ॥यस्यस्मरणमात्रेणजन्मसंसारबंधनात्
विमुच्यतेनमस्तस्मैविष्णवेप्रभविष्णवे॥१॥नमःसमस्तभूतानांआदिभूताय
भूभृते॥अनेकरूपरूपायविष्णवेप्रभविष्णवे॥२॥वैशंपायनउवाच॥श्रुत्वाधर्मा
नशेषेणपावनानिचसर्वशः॥युधिष्ठिरःशांतनवंपुनरेवाभ्यभाषत॥३॥यु
धिष्ठिरउवाच॥किमेकंदैवतंलोकेकिंवाप्येकंपरायणं॥स्तुवंतःकंकमर्चंतःप्रा
प्नुयुर्मानवाःशुभं॥४॥कोधर्मःसर्वधर्माणांभवतःपरमोमतः॥किंजपन्मु
च्यतेजंतुर्जन्मसंसारबंधनात्॥५॥भीष्मउवाच॥जगत्प्रभुंदेवदेवमनंतंपुरु
षोत्तमं॥स्तुवन्नामसहस्रेणपुरुषःसततोत्थितः॥६॥तमेवचार्चयन्नित्यंभ
क्त्यापुरुषमव्ययं ध्यायंस्तुवन्नमस्यंश्चयजमानस्तमेवच॥७॥अनादि

(2)

वि०स०
५८

निधनंविष्णुंसर्वलोकमहेश्वरं॥लोकाध्यक्षंस्तुवंनित्यंसर्वदुःखातिगोभवेत्॥८॥ब्र
ह्मण्यंसर्वधर्मज्ञंलोकानांकीर्त्तिवर्धनं॥लोकनाथंमहद्भूतंसर्वभूतभवोद्भवं॥९॥ए
षमेसर्वधर्माणांधर्मोधिकतमोमतः॥यद्भक्त्यापुंडरीकाक्षंस्तवैरर्चेन्नरःसदा॥१०॥
परमंयोमहत्तेजःपरमंयोमहत्तपः॥परमंयोमहद्ब्रह्मपरमंयःपरायणं॥११॥
पवित्राणांपवित्रंयोमंगलानांचमंगलं॥दैवतंदेवतानांचभूतानांयोव्ययःपि
ता॥१२॥यतःसर्वाणिभूतानिभवंत्यादियुगागमे॥यस्मिंश्चप्रलयंयांतिपुनरेव
युगक्षये॥१३॥तस्यलोकप्रधानस्यजगन्नाथस्यभूपते॥विष्णोर्नामसहस्रंमे
शृणुपापभयापहं॥१४॥यानिनामानिगौणानिविख्यातानिमहात्मनः॥ऋषि
भिःपरिगीतानितानिवक्ष्यामिभूपते॥१५॥ऋषिर्नाम्नांसहस्रस्यवेदव्यासोम

श्री
५८

(2A)

हामुनिः॥ छंदोनुष्टुप्तथादेवोभगवान्देवकीसुतः॥१६॥ ॐ विष्णुंजिष्णुंमहाविष्णुंप्र
भविष्णुंमहेश्वरं॥ अनेकरूपदैत्यांतंनमामिपुरुषोत्तमं॥१७॥ ॐ अस्यश्रीविष्णो
र्दिव्यसहस्रनामस्तोत्रमंत्रस्य॥ श्रीवेदव्यासऋषिः॥ अनुष्टुप्छंदः॥ श्रीनारायणोदे
वता॥ अमृतांशूद्भवोभानुरितिबीजं॥ उद्भवःक्षोभणोदेवइतिमंत्रः॥ विश्वरूपइति
ध्यानं॥ देवकीनंदनस्रष्टेतिशक्तिः॥ शंखभृन्नंदकीचक्रीतिकीलकं॥ शार्ङ्गधन्वाग
दाधरइत्यस्त्रं॥ त्रिसामासामगःसामेतिकवचं॥ सुव्रतःसुमुखःसूक्ष्मइतिहृदयं
सर्वपापक्षयार्थेश्रीविष्णोःप्रीत्यर्थेजपेविनियोगः॥ अथन्यासः॥ विश्वंविष्णुर्वषट्
कारोइति अंगुष्ठाभ्यांनमः॥ आत्मयोनिस्स्वयंजातइतितर्जनीभ्यां॰॥ ब्रह्मण्योब्र
ह्मकृद्ब्रह्मइतिमध्यमाभ्यां॰॥ सुवर्णबिंदुरक्षोभ्यइतिअनामिकाभ्यां॰॥ निमिषोनि

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3)

वि॰स॰ मिषःस्रग्वीइतिकनिष्ठिकाभ्यां॰॥रथांगपाणिरक्षोभ्यइतिकरतलकरपृष्ठाभ्यां॰॥
४१ अथहृदयादि॥एवंहृदयादि॥ॐभूर्भुवःस्वःइतिदिग्बंधः॥अथध्यानं॥शांताकारंभु
जगशयनंपद्मनाभंसुरेशंविश्वाधारंगगनसदृशंमेघवर्णंशुभांगं॥लक्ष्मीकांतंकमल
नयनंयोगिभिर्ध्यानगम्यंवंदेविष्णुंभवभयहरंसर्वलोकैकनाथं॥१॥ॐ॥विश्वंविष्णुर्वष
ट्कारोभूतभव्यभवत्प्रभुः॥भूतकृद्भूतभृद्भावोभूतात्माभूतभावनः॥१॥पूतात्मापरमा
त्माचमुक्तानांपरमागतिः॥अव्ययःपुरुषःसाक्षीक्षेत्रज्ञोक्षरएवच॥२॥योगोयोग
विदांनेताप्रधानपुरुषेश्वरः॥नारसिंहवपुःश्रीमान्केशवःपुरुषोत्तमः॥३॥सर्वश
र्वःशिवःस्थाणुर्भूतादिर्निधिरव्ययः॥संभवोभावनोभर्ताप्रभवःप्रभुरीश्वरः॥४॥स्व
यंभूःशंभुरादित्यःपुष्कराक्षोमहास्वनः॥अनादिनिधनोधाताविधाताधातुरुत्तमः ४१

(3A)

॥५॥ अप्रमेयोहृषीकेशः पद्मनाभोमरप्रभुः॥ विश्वकर्मामनुस्त्वष्टास्थविष्ठः स्थ
विरोध्रुवः॥६॥ अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः॥ प्रभूतस्त्रिककुब्धा
मपवित्रंमंगलंपरं॥ ७॥ ईशानः प्राणदः प्राणोज्येष्ठः श्रेष्ठः प्रजापतिः॥ हिरण्य
गर्भोभूगर्भोमाधवोमधुसूदनः॥८॥ ईश्वरोविक्रमीधन्वीमेधावीविक्रमः क्रमः॥
अनुत्तमोदुराधर्षः कृतज्ञः कृतिरात्मवान्॥९॥ सुरेशः शरणंशर्मविश्वरेताः
प्रजाभवः॥ अहः संवत्सरोव्यालः प्रत्ययः सर्वदर्शनः॥१०॥ अजः सर्वेश्वरः सिद्धः
सिद्धिः सर्वादिरच्युतः॥ वृषाकपिरमेयात्मासर्वयोगविनिःसृतः॥११॥ वसुर्वसु
मनाः सत्यः समात्मासंमितः समः॥ अमोघः पुंडरीकाक्षोवृषकर्मावृषाकृतिः
॥१२॥ रुद्रोबहुशिराबभ्रुर्विश्वयोनिः शुचिःश्रवाः॥ अमृतः शाश्वतः स्थाणुर्व

Joint project of the ... Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५)

वि०स०
५०

राशेहोमहातपाः ॥१३॥ सर्वगः सर्वविद्भानुर्विष्वक्सेनोजनार्दनः ॥ वेदोवेदविदव्यंगोवेदां
गोवेदवित्कविः ॥१४॥ लोकाध्यक्षः सुराध्यक्षोधर्माध्यक्षः कृताकृतः ॥ चतुरात्माचतु
र्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥१५॥ भ्राजिष्णुर्भोजनंभोक्तासहिष्णुर्जगदादिजः ॥ अनघोवि
जयोजेताविश्वयोनिःपुनर्वसुः ॥१६॥ उपेंद्रोवामनः प्रांशुरमोघः शुचिरूर्जितः
अतींद्रः संग्रहः सर्गोधृतात्मानियमोयमः ॥१७॥ वेद्योवैद्यः सदायोगीवीरहामाधवो
मधुः ॥ अतींद्रियोमहामायोमहोत्साहोमहाबलः ॥१८॥ महाबुद्धिर्महावीर्योमहा
शक्तिर्महाद्युतिः ॥ अनिर्देश्यवपुः श्रीमानमेयात्मामहाद्रिधृक् ॥१९॥ महेष्वा
सोमहीभर्ताश्रीनिवासः सतांगतिः ॥ अनिरुद्धः सुरानंदोगोविंदोगोविदां
पतिः ॥२०॥ मरीचिर्दमनोहंसः सुपर्णोभुजगोत्तमः ॥ हिरण्यनाभः सुतपाः ५०

(5A)

पद्मनाभः प्रजापतिः ॥२१॥ अमृत्युः सर्वदृक्सिंहः संधातासंधिमांस्थिरः ॥ अ
जोदुर्मर्षणः शास्ताविश्रुतात्मासुरारिहा ॥२२॥ गुरुर्गुरुतमोधाम सत्यः सत्यप
राक्रमः ॥ निमिषोनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥२३॥ अग्रणीर्ग्रामणीः
श्रीमान्न्यायोनेतासमीरणः ॥ सहस्रमूर्धाविश्वात्मासहस्राक्षः सहस्रपात्
॥२४॥ आवर्त्तनोनिवृत्तात्मासंवृतः संप्रमर्दनः ॥ अहः संवर्त्तकोवह्निरनिलो
धरणीधरः ॥२५॥ सुप्रसादः प्रसन्नात्माविश्वधृग्विश्वभुग्विभुः ॥ सत्कर्तास
त्कृतः साधुर्जन्हुर्नारायणोनरः ॥२६॥ असंख्येयोप्रमेयात्माविशिष्टः शिष्टकृ
छुचिः ॥ सिधार्थः सिध्यसंकल्पः सिधिदः सिधि. साधनः ॥२७॥ वृषाहीर्वृष
भोविष्णुर्वृषपर्वावृषोदरः ॥ वर्धनोवर्धमानश्चविविक्तः श्रुतिसागरः ॥२८॥

(5)

वि०स०
५१

सुभुजोदुर्धरोवाग्मीमहेंद्रोवसुदोवसुः॥नैकरूपोबृहद्रूपः शिपिविष्टःप्रकाश
नः॥२९॥ओजस्तेजोद्युतिधरःप्रकाशात्माप्रतापनः॥ऋधस्पष्टाक्षरोमंत्रश्चंद्रां
शुर्भास्करद्युतिः॥३०॥अमृतांशूद्भवोभानुःशशिबिंदुःसुरेश्वरः॥औषधंजग
तःसेतुःसत्यधर्मपराक्रमः॥३१॥भूतभव्यभवन्नाथःपवनःपावनोनलः॥का
महाकामकृत्कांतःकामीकांतप्रदःप्रभुः॥३२॥युगादिकृद्युगावर्त्तोनैकमायो
महाशनः॥अदृश्योव्यक्तरूपश्चसहस्रजिदनंतजित्॥३३॥इष्टोविशिष्टः
शिष्टेष्टःशिखंडीनहुषोवृषः॥क्रोधहाक्रोधकृत्कर्त्ताविश्वबाहुर्महीधरः॥३४॥
अच्युतःप्रथितःप्राणःप्राणदोवासवानुजः॥अपांनिधिरधिष्ठानमप्रमत्तः ५१
प्रतिष्ठितः॥३५॥स्कंदःस्कंदधरोधूर्योवरदोवायुवाहनः॥वासुदेवोबृहद्भा

(5A)

नुराद्दिदेवः पुरंदरः ॥३६॥ अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ॥ अ
नुकूलः शतावर्त्तः पद्मीपद्मनिभेक्षणः ॥३७॥ पद्मनाभोरविंदाक्षः पद्मगर्भः
शरीरभृत् ॥ महर्धिर्ऋद्धोवृद्धात्मामहाभागोगरुडध्वजः ॥३८॥ अतुलः शरभो
भीमः समयज्ञोहविर्हरिः ॥ सर्वलक्षणलक्षण्योलक्ष्मीवान्समितिंजयः ३९
विक्षरोरोहितोमार्गोहेतुर्दामोदरः सहः ॥ महीधरोमहाभागोवेगवानमिता
शनः ॥ ४० ॥ उद्भवः क्षोभणोदेवः श्रीगर्भः परमेश्वरः ॥ करणंकारणंकर्त्तावि
कर्त्तागहनोगुहः ॥४१॥ व्यवसायोव्यवस्थानः संस्थानः स्थानदोध्रुवः ॥ पर
र्धिः परमस्पष्टस्तुष्टः पुष्टश्शुभेक्षणः ॥४२॥ रामोविरामोविरजोमार्गोनेयोन
योनयः ॥ वीरः शक्तिमतांश्रेष्ठोधर्मोधर्मविदुत्तमः ॥४३॥ वैकुंठः पुरुषः प्राणः

(6)



प्राणदः प्रणवः पृथुः ॥ हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥४४॥ ऋ
तुः सुदर्शनः कालः परमेष्ठी परिग्रहः ॥ उग्रः संवत्सरो दक्षो विश्रामो विश्व
दक्षिणः ॥४५॥ विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययं ॥ अर्थोनर्थो
महाकोशो महाभोगो महाधनः ॥४६॥ अनिर्विण्णः स्थविष्ठो भूर्धर्मयूपो
महामखः ॥ नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥४७॥ यज्ञ ईज्यो
महेज्यश्च क्रतुः सत्रं सतां गतिः ॥ सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्त
मं ॥४८॥ सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ॥
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥४९॥ स्वापनः स्ववशो व्यापी नैकात्मा नैकक
र्मकृत् ॥ वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥५०॥ धर्मगुब्धर्मकृद्ध

(6A)

मेः स दस त्क्षरमक्षरं ॥ अविज्ञाना सहस्त्रांशुर्विधाता कृतलक्षणः ॥ ९१ ॥ गभस्तिने
मिः सत्वस्थः सिंहो भूतमहेश्वरः ॥ आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥ ९२ ॥
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ॥ शरीरभूतभृद्भोक्ता कपींद्रो भूरिद
क्षिणः ॥ ९३ ॥ सोमपोमृतपः सोमः पुरुजित्पुरुसत्तमः ॥ विनयो जयः स
त्यसंधो दाशार्हः सात्वतांपतिः ॥ ९४ ॥ जीवो विनयिता साक्षी मुकुंदो मि
तविक्रमः ॥ अंभोनिधिरनंतात्मा महोदधिशयोंतकः ॥ ९५ ॥ अजो महा
र्हः स्वाभाव्यो जितामित्रः प्रमोदनः ॥ आनंदो नंदनो नंदः सत्यधर्मा त्रिविक्र
मः ॥ ९६ ॥ महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ॥ त्रिपदस्त्रिदशाध्य
क्षो महाशृंगः कृतांतकृत् ॥ ९७ ॥ महावराहो गोविंदः सुषेणः कनकांगदी ॥

(7)

वि० स०
५३

गुह्योगभीरोगहनोगुप्तश्चक्रगदाधरः॥५८॥ वेधाःस्वांगोजितकृष्णोदृढः
संकर्षणोच्युतः॥ वरुणोवारुणोवृक्षः पुष्कराक्षोमहामनाः॥५९॥ भग
वान्भगहानंदीवनमालीहलायुधः॥ आदित्योज्योतिरादित्यः सहिष्णुर्ग
तिसत्तमः॥६०॥ सुधन्वाखंडपरशुर्दारुणोद्रविणप्रदः॥ दिवस्पृक्सर्व
दृग्व्यासोवाचस्पतिरयोनिजः॥६१॥ त्रिसामासामगः सामनिर्वाणंभेष
जंभिषक्॥ सन्यासकृच्छमःशांतोनिष्ठाशांतिःपरायणः॥६२॥ शुभांगःशां
तिदःस्रष्टाकुमुदःकुवलेशयः॥ गोहितोगोपतिर्गोप्तावृषभाक्षोवृषप्रियः॥
६३॥ अनिवर्त्तीनिवृत्तात्मासंक्षेप्ताक्षेमकृच्छिवः॥ श्रीवत्सवक्षाःश्रीवासः
श्रीपतिःश्रीमतांवरः॥६४॥ श्रीदःश्रीशःश्रीनिवासःश्रीनिधिःश्रीवि ५३

(7.A)

भावनः॥श्रीधरःश्रीकरःश्रेयःश्रीमान्लोकत्रयाश्रयः॥६५॥स्वक्षःस्वं
गःशतानंदोनंदिर्ज्योतिर्गणेश्वरः॥विजितात्माविधेयात्मासत्कीर्त्तिश्छिन्न
संशयः॥६६॥उदीर्णःसर्वतश्चक्षुरनीशःशाश्वतःस्थिरः॥भूशयोभूषणो
भूतिर्विशोकःशोकनाशनः॥६७॥अर्चिष्मानर्चितःकुंभोविशुद्धात्मा
विशोधनः॥अनिरुद्धोप्रतिरथःप्रद्युम्नोमितविक्रमः॥६८॥कालनेमि
निहावीरःशोरिःशूरजनेश्वरः॥त्रिलोकात्मात्रिलोकेशःकेशवःकेशिहाह
रिः॥६९॥कामदेवःकामपालःकामीकांतःकृतागमः॥अनिर्देश्यवपुर्विष्णु
र्वीरोनंतोधनंजयः॥७०॥ब्रह्मण्योब्रह्मकृद्ब्रह्माब्रह्मब्रह्मविवर्धनः॥
ब्रह्मविद्ब्राह्मणोब्रह्मीब्रह्मज्ञोब्राह्मणप्रियः॥७१॥महाक्रमोमहाकर्मा

(8)

वि०स०
५४

हातेजामहोरगः॥ महाक्रतुर्महायज्वामहायज्ञोमहाहविः॥७२॥ स्तव्यस्तवप्रियस्तोत्रं
स्तुतिःस्तोतारणप्रियः॥ पूर्णःपुरयितापुण्यःपुण्यकीर्त्तिरनामयः॥७३॥ मनोजवस्ती
र्थकरोवसुरेतावसुप्रदः॥ वसुप्रदोवासुदेवोवसुर्वसुमनाहविः॥७४॥ सद्गतिःस
त्कृतिःसत्तासद्भूतिःसत्परायणः॥ शूरसेनोयदुश्रेष्ठःसन्निवासःसुयामुनः॥७५
भूतावासोवासुदेवःसर्वासुनिलयोनलः॥ दर्पहादर्पदोदृप्तोदुर्धरोथापराजितः॥७६
विश्वमूर्त्तिर्महामूर्त्तिर्दीप्तमूर्त्तिरमूर्त्तिमान॥ अनेकमूर्त्तिरव्यक्तःशतमूर्त्तिःश
ताननः॥७७॥ एकोनैकःसवःकःकिंयत्तत्पदमनुत्तमं॥ लोकबंधुर्लोकनाथोमाध
वोभक्तवत्सलः॥७८॥ सुवर्णवर्णोहेमांगोवरांगश्चंदनांगदी॥ वीरहाविषमःशू
न्योघृताशीरचलश्चलः॥७९॥ अमानीमानदोमान्योलोकस्वामीत्रिलोकधृक्॥ ५४

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8A)

सुमेधामेधजोधन्यःसत्यमेधाधराधरः ॥८०॥ तेजोवृषोद्युतिधरःसर्वशस्त्रभृ
तांवरः ॥ प्रग्रहोनिग्रहोव्यग्रोनैकशृंगोगदाग्रजः ॥८१॥ चतुर्मूर्त्तिश्चतुर्बाहुश्चतु
र्व्यूहश्चतुर्गतिः ॥ चतुरात्माचतुर्भावश्चतुर्वेदविदेकपात् ॥८२॥ समावर्त्तोनिवृत्ता
त्मादुर्जयोदुरतिक्रमः ॥ दुर्लभोदुर्गमोदुर्गोदुरावासोदुरारिहा ॥८३॥ शुभांगोलोकसा
रंगःसुतंतुस्तंतुवर्धनः ॥ इंद्रकर्मामहाकर्माकृतकर्माकृतागमः ॥८४॥ उद्भवःसुं
दरःसुंदोरत्ननाभःसुलोचनः ॥ अर्कोवाजसनःशृंगीजयंतःसर्वविज्जयी ॥८५॥
सुवर्णबिंदुरक्षोभ्यःसर्ववागीश्वरेश्वरः ॥ महाह्रदोमहागर्त्तोमहाभूतोमहानि
धिः ॥८६॥ कुमुदःकुंदरःकुंदःपर्जन्यःपावनोनलः ॥ अमृतांशोमृतवपुःस
र्वज्ञःसर्वतोमुखः ॥८७॥ सुलभःसुव्रतःसिद्धःशत्रुजिच्छत्रुतापनः ॥ न्यग्रोधोदुं

(१)

वि॰ स॰ ५५ वश्वत्थश्चाणूरांध्रनिषूदनः॥८८॥ सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः॥ अमू
र्तिरनघोचिंत्योभयकृद्भयनाशनः॥८९॥ अणुर्बृहत्कृशस्थूलोगुणभृन्निर्गुणोमहान्॥ अ
धृतः स्वधृतः स्वास्यः प्राग्वंशोवंशवर्धनः॥९०॥ भारभृत्कथितोयोगीयोगीशः सर्वका
मदः॥ आश्रमः श्रवणः क्षामः सुपर्णोवायुवाहनः॥९१॥ धनुर्धरोधनुर्वेदोदंडोदम
यितादमः॥ अपराजितः सर्वसहोनियंतानियमोयमः॥९२॥ सत्ववान् सात्विकः
सत्यः सत्यधर्मपरायणः॥ अभिप्रायः प्रियार्होर्हः प्रियकृत्प्रीतिवर्धनः॥९३॥
विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः॥ रविर्विरोचनः सूर्यः सविता रविलो
चनः॥९४॥ अनंतोहुतभुग्भोक्ता सुखदोनैकदोग्रजः॥ अनिर्विण्णः सदामर्षी
लोकाधिष्ठानमद्भुतः॥९५॥ सनात्सनातनतमः कपिलः कपिरव्ययः॥ स्वस्तिदः ५५

(9A)

स्वस्तिकृत्स्वस्तिस्वस्तिभुक्स्वस्तिदक्षिणः ॥९६॥ अरौद्रः कुंडली चक्री विक्रम्यूर्जितशा
सनः ॥ शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥९७॥ अक्रूरः पेशलो दक्षो दक्षि
णः क्षमिणांवरः विद्वत्तमो वीतभयः पुण्यः श्रवणकीर्तनः ॥९८॥ उत्तारणो दुष्कृ
तिहा पुण्यो दुःस्वप्ननाशनः ॥ वीरहा रक्षणः संतो जीवनः पर्यवस्थितः ॥९९॥ अ
नंतरूपो नंतश्रीर्जितमन्युर्भयापहः ॥ चतुरस्रो गभीरात्मा विदिशो व्यादिशो दि
शः ॥१००॥ अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिरांगदः ॥ जननो जनजन्मादिर्भीमो
भीमपराक्रमः ॥१०१॥ आधारनिलयो धाता पुष्पहासः प्रजागरः ॥ ऊर्ध्वगः स
त्पथाचारः प्राणदः प्रणवः पणः ॥१०२॥ प्रमाणं प्राणनिलयः प्राणभृत्प्राणजी
वनः ॥ तत्वं तत्वविदेकात्मा जन्ममृत्युजरातिगः ॥३॥ भूर्भुवःस्वस्तरुस्तारः सविता

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

प्रपितामहः ॥ यज्ञोयज्ञपतिर्यज्वायज्ञांगोयज्ञवाहनः ॥ ४ ॥ यज्ञभृद्यज्ञकृद्यज्ञीयज्ञभुग्य
ज्ञसाधनः ॥ यज्ञांतकृद्यज्ञगुह्यमन्नमन्नादएवच ॥ ५ ॥ आत्मयोनिःस्वयंजातोवै
खानःसामगायनः ॥ देवकीनंदनःस्रष्टाक्षितीशःपापनाशनः ॥ ६ ॥ शंखभृन्नंदकी
चक्रीशार्ङ्गधन्वागदाधरः ॥ रथांगपाणिरक्षोभ्यःसर्वप्रहरणायुधः ॥ ७ ॥ सर्वप्र
हरणायुधोंनमइति ॥ ॥ इतीदंकीर्तनीयस्यकेशवस्यमहात्मनः ॥ नाम्नां
सहस्रंदिव्यानामशेषेणप्रकीर्तितं ॥ १ ॥ यइदंशृणुयान्नित्यंयश्चापिपरिकीर्त
येत् ॥ नाशुभंप्राप्नुयात्किंचित्सोमुत्रेहचमानवः ॥ २ ॥ वेदांतगोब्राह्मणस्यात्क्षत्रि
योविजयीभवेत् ॥ वैश्योधनसमृद्धस्याच्छूद्रःसुखमवाप्नुयात् ॥ ३ ॥ धर्मार्थीप्रा
प्नुयाद्धर्ममर्थार्थीचार्थमाप्नुयात् ॥ कामानवाप्नुयात्कामीप्रजार्थीचाप्नुयात्प्रजां ॥ ४ ॥



Rajwade Sanshodhan Mandal, Dhule

(70A)

भक्तिमान्यःसदोत्थायशुचिःप्रयतमानसः॥सहस्रंभास्करेवस्यनाम्नामेतत्प्रकीर्त्तयेत्॥५॥य
शःप्राप्नोतिविपुलंज्ञातिप्राधान्यमेवच॥अचलांश्रियमाप्नोतिश्रेयःप्राप्नोत्यनुत्तमं॥६॥न
भयंक्वचिदाप्नोतिवीर्यंतेजश्चविंदति॥भवत्यरोगोद्युतिमान्बलरूपगुणान्वितः॥७॥रो
गार्त्तोमुच्यतेरोगाद्बद्धोमुच्येतबंधनात्॥भयान्मुच्येतभीतस्तुमुच्येतापन्नआपदः॥८॥
दुर्गाण्यतितरत्याशुपुरुषःपुरुषोत्तमं॥स्तवन्नामसहस्रेणनित्यंभक्तिसमन्वितः॥९॥
भास्करेवाश्रयोमर्त्योभास्करदेवपरायणः॥सर्वपापविशुद्धात्मायातिब्रह्मसनातनं॥१०॥
नभास्करदेवभक्तानामशुभंविद्यतेक्वचित्॥जन्ममृत्युजराव्याधिभयंनैवोपजायते॥११॥
इमंस्तवमधीयानःश्रद्धाभक्तिसमन्वितः॥युज्येतात्मसुखक्षांतिश्रीधृतिस्मृतिकीर्त्ति
भिः॥१२॥नक्रोधोनचमात्सर्यंनलोभोनाशुभामतिः॥भवंतिकृतपुण्यानांभक्तानांपुरु

(११)

॥ वि०स०
॥५७॥

षोत्तमे ॥१३॥ द्यौः सचंद्रार्कनक्षत्रा खंदिशो भूर्महोदधिः ॥ वासुदेवस्य वीर्येण विधृता
नि महात्मनः ॥१४॥ससुरासुरगंधर्वं सयक्षोरगराक्षसं ॥ जगद्वशे वर्त्ततेदं कृष्णस्य स
चराचरं ॥१५॥ इंद्रियाणि मनोबुद्धिः सत्वं तेजो बलं धृतिः ॥ वासुदेवात्मकान्याहुः क्षेत्रं क्षे
त्रज्ञ एव च ॥१६॥ सर्वागमानामाचारः प्रथमः परिकल्पते ॥ आचारप्रभवो धर्मो धर्मस्य
प्रभुरच्युतः ॥१७॥ ऋषयः पितरो देवा महाभूतानि धातवः ॥ जंगमाजंगमं चेदं जगन्नारा
यणोद्भवं ॥१८॥ योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादि कर्म च ॥ वेदाः शास्त्राणि विज्ञा
नमेतत्सर्वं जनार्दनः ॥१९॥ एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ॥ त्रीन्लोकान्व्या
प्य भूतात्मा भुंक्ते विश्वभुगव्ययः ॥२०॥ इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्त्तितं ॥ पठेद्य
इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥२१॥ विश्वेश्वरमजं देवं जगतः प्रभवाव्ययं ॥ भजंति ५७

the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(11A)

येपुष्कराक्षंनतेयांतिपराभवं ॥ २२ ॥ अर्जुनउवाच ॥ एषनिष्कंटकः पंथायत्रसंपूज्यतेहरिः
कुपथंतंविजानीयाद्गोविंदरहितागमः ॥ २३ ॥ पद्मपत्रविशालाक्षपद्मनाभसुलोचन
भक्तानामनुरक्तानांत्राताभवजनार्दन ॥ २४ ॥ श्रीभगवानुवाच ॥ योमांनामसहस्रेण
स्तोतुमिच्छतिपांडव ॥ सोहमेकेनश्लोकेनस्तुतएवनसंशयः ॥ २५ ॥ नमोस्त्वनंतायस
हस्रमूर्तयेसहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्नेपुरुषायशाश्वतेसहस्रकोटि
युगधारिणेनमः ॥ २६ ॥ रामरामेतिरामेतिरमेरामेमनोरमे ॥ सहस्रनामतत्तुल्यंरा
मनामवरानने ॥ २७ ॥ नमोब्रह्मण्यदेवायगोब्राह्मणहितायच ॥ जगद्धितायकृष्णा
यगोविंदायनमोनमः ॥ २८ ॥ आकाशात्पतितंतोयंयथागच्छतिसागरं ॥ सर्वदेवनम
स्कारंकेशवंप्रतिगच्छति ॥ २९ ॥ श्रीकेशवंप्रतिगच्छत्योंनमोनमइति ॥ ॥ इतिश्रीमहा

(12)

वि० पं०
५८

भारतेशतसहस्रसंहितायांवैय्यासक्यांशांतिपर्वणिदानधर्मेषुविष्णोर्दिव्यसहस्र
नामस्तोत्रंसंपूर्णं ॥ ७ ॥ अस्यश्रीविष्णुपंजरस्तोत्रस्य ॥ नारदऋषिः ॥ श्रीकृष्णपरमात्मा
देवता ॥ अनुष्टुप्छंदः ॥ सर्वरक्षार्थेजपेविनियोगः ॥ ध्यानं ॥ परंपरस्याःप्रकृतेरनादि
मेकंनिविष्टंबैकुंठधागुहाशयं ॥ सर्वालयंसर्वचराचरस्थंनमामिविष्णुंजगदेकनाथं ॥ १ ॥
विष्णुपंजरकंदिव्यंसर्वदुष्टनिवारणं ॥ उग्रतेजोमहावीर्यंसर्वशत्रुनिकृंतनं ॥ २ ॥ त्रिपु
रंदह्यमानस्यरहस्यंब्रह्मणोदितं ॥ तदहंसंप्रवक्ष्यामिआत्मरक्षाकरंपरं ॥ ३ ॥ पादौरक्ष
तुगोविंदोजंघेचैवत्रिविक्रमः ॥ ऊरूमेकेशवोरक्षेत्कटिंचैवजनार्दनः ॥ ४ ॥ नाभिंचैवा
च्युतोरक्षेद्गुह्यंरक्षतुवामनः ॥ उदरंपद्मनाभश्चपृष्ठेचैवतुमाधवः ॥ ५ ॥ वामपार्श्वेस्थि
तोविष्णुर्दक्षिणेमधुसूदनः ॥ बाहूभ्यांवासुदेवश्चहृदयंरुक्मिणीपतिः ॥ ६ ॥ कंठंरक्षे ५८

[2A]

ध्ववाराहः कृष्णश्च मुखमंडले ॥ माधवः कर्णमूलेतु हृषीकेशश्च नासिके ॥ ७ ॥ नेत्रेनारा
यणोरक्षेल्ललाटेगरुडध्वजः ॥ कपोलौकेशवोरक्षेद्वैकुंठः सर्वतोदिशः ॥ ८ ॥ श्रीवत्सोपितु
सर्वेषां अंगानांचैवरक्षतु ॥ पूर्वस्यांपुंडरीकाक्षः आग्नेयांश्रीधरस्तथा ॥ ९ ॥ दक्षिणेना
रसिंहश्चनैर्ऋत्यांपुरुषोत्तमः ॥ मधुसूदनवारुण्यांवायव्यांपीतवाससः ॥ १० ॥ गदा
धरस्तुकौबेर्यांशंखईशान्यतोदिशः ॥ आकाशेचगदांरक्षेत्पातालेचसुदर्शनः ॥ ११ ॥ संन
ध्यसर्वगात्रेषुप्रविष्टोविष्णुपंजरं ॥ विष्णुपंजरेनिविष्टोहंविचरामिमहीतले ॥ १२ ॥ राजद्वा
रेपथेघोरेसंग्रामेरिपुसंकटे ॥ नदीषुतरणाचवचोरव्याघ्रभयेषुच ॥ १३ ॥ डाकिनीप्रेतभू
तेषुभयंतस्यनजायते ॥ रक्षरक्षमहादेवरक्षरक्षबलेश्वरः ॥ १४ ॥ जलेरक्षतुवाराहः स्थ
लेरक्षतुवामनः ॥ अटव्यांनारसिंहश्चसर्वतः पातुकेशवः ॥ १५ ॥ दिवारक्षतुमांसूर्यो

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

वि॰पं॰ ५९

रात्रीरक्षतु चंद्रमाः ॥ पंथानं दुर्गमेरक्षेत्सर्वत्रैव जनार्दना ॥ १६ ॥ रोगविघ्नकृतश्चैव ब्र
ह्महा गुरुतल्पगः ॥ स्त्रीघाती बालघातश्च सुरापी वृषलीपतिः ॥ १७ ॥ मुच्यते सर्व
पापेभ्यो पठनाच्च न संशयः ॥ अपुत्रो लभते पुत्रं धनार्थी लभते धनं ॥ १८ ॥ विद्यार्थी ल
भते विद्यां मोक्षार्थी लभते गतिं ॥ आपदा हरते नित्यं विष्णुस्तोत्रां र्थसंपदा ॥ १९ ॥ य
स्त्विदं पठते स्तोत्रं विष्णुपंजरमुत्तमं ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ २० ॥
गोसहस्रफलं तस्य वाजपेयशतानि च ॥ अश्वमेधसहस्राणि फलं प्राप्नोति मान
वः ॥ २१ ॥ जले विष्णुस्थले विष्णुर्विष्णुः पर्वतमस्तके ॥ ज्वालामालाकुले विष्णुः सर्वं
विष्णुमुच्यते ॥ २२ ॥ इति श्री ब्रह्मांडे पुराणे विष्णुपंजरस्तोत्रं संपूर्णं ॥ श्रीकृष्णा
र्पणमस्तु ॥ श्री विंध्यवासिनी प्रसंन वरदोस्तु ॥ शुभं भवतु ॥ विश्वेश्वरार्पणम्

श्री ५९

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com